Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३४०

Title शास्त्र दीपिका व्याख्या प्रभा
१२ शा ध्याय:

Author वैद्यनाथः

Extent १६ Age १०६६

Subject पू. मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्रदीपिका व्याख्या प्रभा द्वादशाध्यायः

पत्र ४०

4340

F. [illegible] 16

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰ दी॰ १

॥ ॥श्रीमहागणपतये नमः॥ ॥ॐ त्रिसमवाये॥ ॥पूर्वाध्याये नमहास्याध्यायस्य संगतिं दर्शयितुमा
ह। समुदिति। तदर्थानुष्ठितस्यैव तदुपकारकत्वस्य प्रायशो दर्शनात्तत्रैव सार्गिके। प्रसंगसंगतं त्रिसमवायपा
तादिनाग्न्युद्यमालोपि विशेषे क्वचिदेवोपकारलाभेनेति विशेषरूपमात्रेऽसर्गाधीनइ विहेतु हेतुमद्भा
वसंगतिरिति भावः। प्रसंगश्च स्वानुद्देश्यकपदार्थानुष्ठानजन्योपकारलाभः। यथा पुरोडाशस्य त्वा
नुद्देश्यकपशुश्चार्थानुष्ठितप्रयाजजन्योपकारलाभः प्रणयनस्य च स्वानुद्देश्यकगोदोहनानुष्ठान
जन्योपकारलाभ इति। इदं चैवं अत्र च वाजिन न तु सोपवादादावप्रयोजकेति प्रसंगव्यावर्तये प्रयोजक
त्वरक्षितमत्वे सतीति विशेषणं योध्यं करिष्यमाणविचारार्थं वस्तु स्थापयति माह अ ... इति
तत्र पुरोडाशे विहित इति शेषः। पशुपुरोडाशं। पशुयागांगपुरोडाशं। पूर्वपक्षमाह अंगानीति। पशु
कालानि। पशुयागे प्रकृतिवत्कमानुष्ठितानि। पुरोडाशं पशुयागांगपुरोडाशं। पूर्वं यतानि पिस्था
दतन्त्रमाह अनागत इति। अनागते पशुकालानि। परभाविनि पुरोडाशकाले सति तदर्थतानेस्पर्शं त
थाच प्राकृतस्य प्रयाजानंतरमाग्नेभागो ततः प्रधानमिति क्रमस्यासंभवान्न पुरोडाशार्थतेति भावः। राम १
ननु पुरोडाशार्थत्वाभावेपि तदुपकारकत्वसंभवान्न पुनरनुष्ठानं स्यादत आह अन्येति। अन्य

© Dharmartha Trust J&K. Digitized by eGangotri

मात्रेयमर्थः अन्यथा तं चानुपपत्तेः तस्येयमनंतरमुपकारकमित्यनुषंगः प्रकृतीति अन्यथा स्वर्गा
र्थं तयानुष्ठितदर्शादितः पुत्रादेरप्युत्पत्त्यापत्तेरिति बोध्यं ननु पितृतस्यर्थमनुष्ठिते न तत्तनदाने स
नाम्नोपकारस्यनोकेद्दर्शनान्नतदर्थानुष्ठितस्येवतदुपकारकत्वमिति निपमइत्यतआह तथाप्र
कृतीति प्रकृतिवदिमति दर्शेनयथाप्रकृतौतदुद्देशेन कृतस्य तदुपकारित्वमेवं विकृतावपीति बो
ध नाम्नोकेच हद्गमात्रोपकारस्य प्रसक्षगम्यत्वेप्यत्रान्नौकिकोपकारेमानाभावइति भावः ननु प्रकृ
तावुद्देशस्यार्थिकत्वात्तत्रचार्थिकं चोदकः प्रतिदिशतीति न्यायेन तदनतिदेशादन्यार्थेनाप्युपकारसं
भवइत्यतआह किंचेति स्वकाले वपयाप्रचर्येति विहितवपाप्रचारोनरकाले ननु प्रसंगतउप
कारत्वाभावाच्छास्त्रछतिरिक्तानुष्ठानपरमेवेति न तद्धिरोधइत्यतआह देवगुणापचेति नतीपशोक
रोतीति निषेधात् पशावात्स्यभागयोर्दिकन्यइत्यर्कर्दशमे तत्र पशावकदूशापक्षेपरोडाशार्थत्वेन
तयोरनुष्ठानात्स्वपाजन्यतर्थस्यात्स्यभागांगस्य प्रसंगपक्षेवाधइत्याह तदिहेति पशावात्स्यभागकरणा
पक्षेवाह अथवेति वैगुण्यापातरयप्याह गुणेति पशावेकादशप्रयाजा- पत्नीमेकादशत्वे प्रयाजा
गुणाः तिष्ठंतपरं प्रजयंतीतिच कालः एवमनुयाजानामेकादशत्वं पषदाज्य इत्यत्र कर्त्वं चगुणा

© Dharmartha Trust J&K. Digitized by eGangotri

रा॰ दी॰ २ स्तत्कृतं पुरोडाशे वैगुण्यापत्तेः तत्र प्रकृतिवत्प्रयाजानां पञ्चत्वात् हविरासादनोत्तरकालत्वाच्च । तृथानुयाजानां त्रित्वात्के
वलाज्यद्रव्यकत्वाच्चेत्यर्थः । सिद्धान्तमाह विकृताविति । समापयितः समर्पयितुमारब्धः इत्यादिकर्मणि क्तप्रत्ययः । पश्व
र्थ रेवोपकारत्वाभावात् याजानां पुरोडाशेति देशस्यापि प्रयोगवदेकत्वेनात । यद्वा विध्यन्तदेशादेनोपकारसंपाद
नं ग्राह्यमिति न विरोधः । तेन वेति नाघवत्पोपपत्तिकथनं श्लोकं व्याचष्टे पुरोडाशेति । अङ्गगतान्योपकारवत्ता
धिकारत्वस्य पूर्वं न साधनेऽपेक्षिता । तत्र पशुधामुपकारत्वात्पश्वर्थकृताङ्गतत्यानां नाभत्तहृत्वावदङ्गत्वकाङ्गा
निदेशाकल्पनं तदनुष्ठापनं च विनैव सिद्धमिति तद्व्यतिरिक्तोपकारेतनकाङ्गाविशिष्टतयैवातिदेशावगतयापु
रोडाशानुष्ठानं प्रयोगविधिना बोध्यते तद्धेत्वाध्यानां तत्कालनियमापगंतान्येषामिस्यर्थः । उक्तन्यायस्य प्रकृतो
पयोगमाह तेनेति । प्रधानमात्रत्वेनेन तत्कृतोपकाराङ्गवत्त्वे कदाचित् गुणकालनयोरप्युपपन्नश्रुत्वात् । ननु सं
ख्याकालनयुषत्ताभेदात्प्राकृतकार्यकार्यान्तरप्रसंगे कथं प्रसङ्गन्यायः स्यादत आह नहीति । प्राकृतकार्यसा
धनयपदार्थोद्देशेन संख्यादिविशेषमात्रविधानं नकार्यभेदइति भावः । मध्ये पतान्यत्रिसमस्यव्यावर्त्यं दर्श रा॰म॰
पितृ शङ्कते । नन्वेवमिति । इष्टापत्तिरीत्या परिहरति । तत्रेति । वषड्क्रियापाधारत्वाव स्यर्थः । आह वनीयेति २
पत्नीसंयाजव्यावृत्त्यर्थः । निराकृतमिति । एकादशाइतिशेषः । तथाच तत्र मध्यपातत्वप्रहेत्वभावान्न दर्शप

© Dharmartha Trust J&K. Digitized by eGangotri

र्णमासं तन्त्रप्रसंग इति भावः एतदेवाविष्करोति । पौर्णमास्यामिति । परशास्त्रापेक्षि, वीहि तदुपाश्रितोप
कारवत्त्वात्तन्त्रं बनेन प्रसंगन्यायः पश्याप्रधानभूतपशुपुरोडाशापेक्षिताः पुरोडाशविधौ दर्शितहेतुनेत्यादि
न पौर्णमास्युपकारवत्त्वं दर्शशास्त्रतात्पर्यविषय इति पृथगेतानुष्ठानमित्यर्थः । प्रसंगे हानिः । शास्त्रतात्पर्या
विषये प्रसंगेनोपकृते सतीत्यर्थः । प्रकृतेन हि सम्बन्धमाह । इह त्विति । उपस्थितात्पशुकाङ्गोपकारवैशिष्ट्यस्य
वपुरोडाशशास्त्रतात्पर्यविषयत्वाभावादिति वैषम्यमित्यर्थः । पत्विति । उद्देशांशस्याप्युपकारजनकत्वान्नुद
भावादुपकाराभाव इति शंकार्थः । नहीति । प्रयाजादिभिर्दर्शपूर्णमासोपकारं भावयद्भिर्देवशास्त्रार्थो नन्वत
उद्देशेनानुष्ठितैरित्येतावमर्थतापि स्वार्थिकत्वमेवोद्देशांश इत्यर्थः । प्रसंगलक्षणमाह । अन्यार्थेति । अत्र नाप्र
योजकेति प्रसंगवारणाय प्रयोजकत्वशक्तिमत्वे सतीति विशेषणमवगन्तव्यं । सूत्रार्थस्तु । तं त्रिणां संगवतो प्र
धानानां समवाये चोदनातः समानानामेकदेशकालकर्तृकाणामैकतंत्र्यमाग्नेयादीनामुक्तं । अन्येषु तूप
स्पृष्टपुरोडाशादिषु भेदः स्यादङ्गानां । कुतः । विधिप्रक्रमस्यांगानुष्ठानस्य तादर्थ्यात् अस्य स्वार्थत्वात् । अत्र हेतुः । अ
ग्नापुरोडाशकालस्यानिर्देशात् । वपयाप्रचर्येति वपायागोत्तरं पुरोडाशकालत्वे इति ॥ ॥ जैमिनेः ॥ ॥ अत्र पृथ

© Dharmartha Trust J&K. Digitized by eGangotri

रांगानुष्ठानस्य क्वाचित्कविषयेऽपवादाऽसंगतिरितिसूचयितुमुत्सर्गमनुवदति· स्यातामिति· तदर्थमि
ति· पुरोडाशेन· तद्विधिना· पशुचोदकेनैव प्राप्तानामंगोपकाराणां पुरोडाशविशेषणत्वेन प्रयोगविधिना
संग्रहान्निराकांक्षत्वपातिदेशाकल्पने, वाऽस्य भागानुष्ठाने· तत्कल्पनेन तु आऽस्य भागोपकारस्यालब्धस्य
दाऽस्य भागानुष्ठानमिति फलफलिभावो बोध्यः पूर्वपक्षमाह तत्रेति· सत्त्वतः प्रयोगवचनबाधेऽप्रवृत्ते
किंचिदप्यंगं पुरोडाशयागस्योपकरणं च नानुष्ठापयेत्यपि दूषणं बोध्यं चोदकेनेति· अंगस्य सतः प्रयो
गविधिविषयत्वाच्चोदकाभावे च प्राकृतोपकाराणां पुरोडाशभावनासंबंधानवगमात्तदंगाकार आ
वश्यक इत्यर्थः तेन त्विति· पुरोडाशीयचोदकेनेत्यर्थः समर्पितेषु· समर्पयितुमारब्धेषु· तेनेति प्रसं
गोपजीवनेनेत्यर्थः एवं चोदकैकदेशोऽपि प्रयाजादिपदार्थविषयो वाऽध्यतइत्यापितेयं गुरुमतमप्र
सक्तं त्विति· प्रयोजकत्वं· अननुष्ठानाक्षेपकत्वं· विधेः पुरोडाशप्रयोगविधेः तदुक्तं गुरुणा· नाय राम
प्राप्ते बाधः किंत्वननुष्ठानस्येति· विवृतं चैतद्गुरुविमलापंचिकायां शालिकानाथेन· प्राप्तेरनुष्ठानाक्षेपस्य ३
पापानापवाधः इति· प्रयोगविधेः प्रयाजाद्यनुष्ठानपरत्वे सत्यप्यनुष्ठानाभावः कुत इत्यत आह

© Dharmartha Trust J&K. Digitized by eGangotri

सत्येवेति॰ अन्यार्थैरेव॰ अन्यार्थानुष्ठितैरेव॰ तदुक्तं शालिकानाथेन॰ प्रयोजनमपि प्रत्यनुष्ठानहेतुर्न प्राप्तिमात्रमपि
ति॰ ननु शास्त्रस्यानुष्ठानपरस्य बाधे को दोषस्तत्राह॰ एवं चेति॰ अप्रयोजकत्वात्॰ बाह्यानन्तु षोपवापादेः॰ विशेषाविनाभू
ताय॰ पृथगनुष्ठितैरेवेति॰ उत्क्रमकानादिति शिष्टतयानुष्ठितैरित्यर्थः॰ प्रयुक्तिसामर्थ्यमेवेति॰ परप्रयुक्ततया
व गौंस्य हि कपालादेस्तुषोपवापांगत्वे तद्विषया प्रयुक्तिशक्तिस्तुषोपवापेन कल्प्यते॰ पुरोडाशे तु न परप्रयुक्त
स्यांगता वोधकं प्रमाणमस्ति येन प्रयुक्तिसामर्थ्याभावः स्यादपि तु सत्येव सामर्थ्ये प्रसंगोपकारकत्वाभावादननु
ष्ठानमिति विशेषइत्यर्थः॰ प्रयोजनाभावादननुष्ठानमित्यत्र दूषणान्तरमाह॰ यदि चेति॰ प्राकृतस्याः॰ आमिक्षायाः॰
विकाराद्वेति परवाधिकरणोक्तत्वं॰ गुणकानादिविकारादपि भेदेन स्यात्॰ अर्थस्यांगजन्योपकारस्याविकृतत्वा
दिति तदर्थः॰ तथा च शास्त्रतात्पर्यवलादेव कार्यावश्यंभावान्न तदभावादननुष्ठानमिति भावः॰ कार्यस्यासिद्धा
वननुष्ठानेपि तस्यानिष्पत्त्यस्य प्रमाणत्वे प्रसंगोनसिद्ध्येदित्याह॰ किं चेति॰ हविरासादनोत्तरकालाभावादेर्गुणोपक
र्याविधिदिमने नोक्तं॰ अननुष्ठितानीति॰ आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीत्यत्र क्रमविधानादिति भावः॰ अधि
कानामेव॰ प्रसंगादनर्थानामेव। प्रसंग इति परवान्वितः॰ उपसंहरति तस्मादिति॰ एतच्च चोदकैकदेशानोपपत्त्या
प्युपपन्नक्षराणां बोध्यं॰ सूत्रार्थस्तु॰ जैमिनेर्मते परतो न्नापत्तेः परतन्त्रोपजीवनादेव स्वकार्यपतेत्रस्य प्रयाजादेः॰

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰
४

प्रतिषेधः स्यात्सत्वात्प्रमाणाभावादेः परतं च मध्यवर्त्तितया अनारम्भादिति॥ ॥नानार्थत्वात्॥ ॥दार्शिकवेधाः पृथ
गननुष्ठानस्याधनादापवादिकी संगतिः प्रचारेति अवदानादियागांतानुष्ठानस्य प्रचारपदार्थ,वात्तदर्थत्वाप्रिपत्ति
शाभ्यामहेऽस्यांकर्त्तुमिति वचनाद्वगते. नत्वहविरासादनार्थत्वमित्यर्थः सूत्रेनानार्थत्वाद्धिन्त्रप्रयोगे न वाहि
स्पर्थः॥ ॥पात्रेषु च॥ ॥आपवादिकी संगतिः सोमार्थान्येवेति ग्रहचमसादीनामर्थः अर्थस्याविकृतत्वादिदत्येत्र
मा च पृ. न चेति.॥ ॥शामित्रे॥ ॥इहातिदेशिकी संगतिः पशोर्यः शामितान संबंधी अयंतार्थः गार्हपत्ये शा
नामुखीये. पचोतऊर्ध्वं गार्हपत्यः संपद्यत इत्यग्नीषोमप्रणयनोत्तरं तस्य गार्हपत्यकार्यकारित्वोक्तेः॥ ॥अपरा
च॥ ॥आतिदेशिक्येवतसंगतिः कौण्डपायिनामयनेयदग्निहोत्रं तच्चैति व्यधिकरणोसमस्यो प्राजहितशब्दो मुख्य
गार्हपत्यवचनः सोमेआहवनीयात् उत्तरवेद्यामग्निप्रणयनोत्तरमवशिष्टाहवनीयस्य शालामुखीय इति संज्ञा.
स एव चातऊर्ध्वं गार्हपत्यो भवतीति वचनाद्गार्हपत्यकार्ये विनियुक्त इति गौणो गार्हपत्यः परंपरयेति. ऽसोति
ष्टोमातदहादेशाहे तस्माद्वामयने तस्मान्नकौण्डपायिनामयने प्राप्त इति परं परेतार्थः नाम धेयात्. नामाति
देशात्. उक्तं समस्मांत्ये. गृहमतं दूषयितुमुपन्यस्यति. केचिदिति. कथं तर्हि समस्मांसमे नागतार्थतेति शंकते न
न्विति. अतऊर्ध्वमिति वचचैनेन शालामुखीयस्य हविः अपरो प्रवत्तेरावरपकवात्मस्यसंगोपत्नीवनाशंका

राम
४

निरासार्थत्वेन न पौनरुक्त्यदोष इत्यादि तस्याभिप्रायादिः साहुराप संभवे वैगुण्यायायोगस्यासिद्धत्वात्तस्य पस्य
पूर्वाधिकरणयोरेवोक्तेराह पूर्ववदिति ॥ ॥रुद्विर्यजेत ॥ ॥आतिदेशिकस्येव संगतिः हविःक्षीयते त्वेति हविर्विधा
ने अनः शकटं एतावत् अनसद्धपरि निर्वापमात्रे अपरेणा पश्चिमतः मैत्रवत मेत्रयुक्ते यथास्यात्तथा
प्राग्वंशः पत्नीशाला तथा च तत्रितयस्य प्रधानस्य वैगुण्यापत्तिरित्यर्थः न च प्रसंगेन एवांगस्य देशा
भाव कृत वैगुण्यांगीकारो भवति शंक्यं अनुपादेयदेशरूपपदार्थस्यागापेक्षया नेतराक्षेपस्येवौचि
त्यादितिभावः ॥ ॥तद्युक्तं ॥ ॥सैव संगतिः सिद्धान्तमाह पदीति तद्युक्तंदीक्षाकालनियुक्तं तागरणं कालभेद
त्वप्रसक्तत्वात् इमव्याहारेणास्तत्वपोत्ये ॥ ॥पंचाश ॥ ॥संगतिन्नैव ॥ आलापिवादित्वात् आत्मकर्तृकत्व
प्रकाशकत्वात् अध्याया संगतिमाशंक्याह सकृदिति ॥ ॥धारणार्थत्वात् ॥ ॥एवंगनुष्ठानापवादात्संग
तिः विहृतस्य प्राद्धृतस्य आघर्षेति पूर्वेद्युरग्निं कल्तीति विधाना स्वार्थमोपस्थितसन्निधनव्यापारार्थं
तैवेत्यर्थः अत एव प्रकृतौ नान्वाधानवकीर्णिरित्याह नहीति ॥ ॥तथा ॥ ॥व्रतोपायने व्रतस्वीकारः शेषं सु
गमम् ॥ ॥ग्रहणार्थं च ॥ ॥दृष्टेति समिधभेपरूपान्वाधानेनाग्निधारणस्य प्रसक्तत्वात् सिद्धत्वादित्यर्थः अ
वमः कनिष्ठः उभयतः उभाभ्यां पक्षपातीति दीक्षितव्यमाराइतिक्रियार्थो योक्रियापामुपपदे नत्प्रत्यये

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी·
५

5

नदीक्षणीयायादीक्षार्थत्वात्तस्याश्च प्रधानभूतसोममात्रार्थत्वेन तत्द्वारादीक्षणीयायाअपितथात्व
दार्थ्यवादिकदेवतापरिग्रहार्थत्वमपिप्रधानविषयमेवेतिभावः विशिष्टदेवशब्देरूढिमाशंक्यनिराकरोति·
नहीति· नन्वेवमपिदीक्षणीयायागार्थोदेवतापरिग्रहोनान्वाधानेविनेत्यतआह· पदइति· अभ्युपगममपक्ष
इत्यनेनपरमार्थतस्त्वत्राप्यननुष्ठानमेवेतिदर्शितं· सूत्रार्थस्तु· पूर्वोक्तंदेवताग्रहणार्थमप्यन्वाधानेनका
र्यमित्येवंदीक्षणीयायास्तदर्थत्वादिति·॥ ॥संनहनेच॥ ॥आतिदेशिकीसंगतिः ननुयोक्त्रेणपत्नीसंनह्य
तीतिद्वितीयाध्यायोक्तपत्नीसंस्कारार्थसंनहनेनवासोधारणार्थमिमाशंक्यसंस्कारोपिकर्मानुष्ठानसौक
र्यरूपोदृष्टएवेतिसौमिकेमेवतस्मिद्धेनपृथगनुष्ठानमित्याह· अपायेति·॥ ॥प्रव्य॥ ॥आतिदेशि
क्येवसंगतिः· पयोव्रतारण्याशनयोर्विज्ञातीयतत्प्रिरूपकार्यभेदात्प्रसंगइत्यधिकाशंका· तत्पोरा
नुषंगिकत्वात्पारणाधारणामेवकतरूपयोगितयापुरस्कार्यमितिप्रसंगोपपत्तिरितिसिद्धान्तमाह· वस
र्थत्वादिति·॥ ॥शेष॥ ॥आपवादिकीसंगतिः· तदिदमिति· यद्यपिवषट्कृतहोमाभिषवभक्षणांचतद्धदित्यत्र तप ५
सोमभक्षेहोमाभिषवरूपनिमित्तसाहित्यविवक्षाविद्यमानामाचस्थितंतथापिप्रासेभक्षेहोमाभिष
वकर्तृविधानमितिसिद्धान्तेभक्षप्रापकविधौशेषसंस्कारकत्वस्यद्वितीयध्यायाकृतिवशेनस्फुटत्वात्तन्त्रास्या

© Dharmartha Trust J&K. Digitized by eGangotri

र्थस्यासिद्धत्वेनान्वयस्तत्तच्च तेनाग्नीषोमीयपशुसाहित्याविवक्षा साधनाभिहितत्वस्य पर्यन्ताभिरासङ्ग इति न ग
तार्थत्वमिति बोध्यं ॥ ॥भक्ष्यवादः॥ ॥अपवादिकी सङ्गतिः उक्तं हस्तीपे । सिद्धान्तमाह प्रसङ्गेति । दक्षि
णाः सोमस्येति वचनस्य प्रसङ्गापवादकत्वेनार्थकमाह । किं चेति । कर्तृभेदे च प्रयोगभेदापत्तिरिति भा
वः ननु सोमेति सोमप्रयोगविधौ प्रधानस्य वक्तव्यत्वं कृतमङ्गेषु तु प्रयोगात्तः पातात्कन्यमेवेत्यत आह । किं
चेति । कर्त्रैकत्वस्य प्रयोगाङ्गत्वादङ्गानां तं विना चेदनुपपत्तेस्तदावश्यकं । दक्षिणायास्तु प्रधानमात्राङ्गत्व
मन्येन प्रसङ्गतदुपजीवनेऽप्यविरुद्धमिति भावः । सोमिकैवदक्षिणापाकर्तृणामन्तत्वादानतत्वात्र पृथक्त्व
रिक्रयोन्वाहार्यदक्षिणेति सूत्रार्थः ॥ ॥शेषभक्षः॥ ॥आपवादिकी सङ्गतिः नानस्य पञ्चेति । आनताव
न्वाहार्यनियमात्तद्विरोधान्न भक्षणमामानस्यर्थताकल्पने सामर्थ्यः । निराकृतं शेषभक्षाप्यन्त द्वि हिति
सूत्रे रोतीति शेषः ॥ ॥प्रवृत्तत्रा ॥ ॥आतिदेशिकी सङ्गतिः हो तेति मन्त्रे रोमस्यर्थः एतेन इति मन्त्र आदि प्रस्यतेनेस्य
र्थः न त्विति । वरणस्य कर्मणि प्रवर्तनार्थत्वेन दृष्टार्थता प्रवर्तने तु वरणमदृष्टार्थमेवेत्यर्थः पूर्ववत्त्वमेव
पक्षाहरणाभावेनेच त्विति । स्यादृष्टार्थता प्रयोजकं ननु प्रवर्तनत्वं लोपादन्येव वरणासंभावनयापि प्रवर्तमानप
त्तेरिति पूर्वपक्षी समाधत्ते नैव मिति । प्रसवदाने अप्रवृत्तादाने न त्विति । संभावनयात्तु प्रवर्तत्तस्य कदापि

© Dharmartha Trust J&K. Digitized by eGangotri

शा.दी.
६
6

निवृत्तेरपिसंभवात्प्रयोगवैगुण्यपरिहाराय लौकिकाग्न्यर्थं नस्याप्रवृत्तप्रवर्त्तनार्थं भावश्यकत्वपावै
धस्याद्दृष्टार्थत्वान स्वप्नभावादिति भावः क्षिप्यत इति। प्रणीताप्रणयनकाल इत्यर्थः। शेषं सुगमं॥ ॥पतोस्य
ति॥ ॥आपवादिकी संगतिः उक्तमेवेति। चतुर्थ इति शेषः। बर्हिरुपादानार्थं लवनस्य स्रुक्संबंधविनाव
र्हिः साधारणापानुपपत्तेः प्रोक्षणादय इत्युक्तेः मध्येति। तत्रिमध्यपाते श्यपकारानपवर्गादवगमात्प्रसंगत
द्भावेत्तु कार्यस्यनाशात्तु प्रसंगसंभव इत्यर्थः ननु लवनतंत्र तावत्प्रोक्षणादेरपि तंत्रेनैव स्यादित्याशंक्य
निरस्यति। नापीति। लवनस्य तु बर्हिरुत्पादकत्वपावर्हिः साधारणपविधिबलात्तंत्रता। प्रोक्षणादेस्तु
बर्हिरनुत्पादकत्वान्नसाधारण्यपविध्यन्यथानुपपत्तिस्तंत्रतां विनेतिगम्यमाना विशेषत्वात्तंत्र
तेति भावः। बर्हिर्द्वारेति। तथा च द्वारस्य साधारणत्वेनानपवर्जनात्तत्संस्काराणामपि कार्यनाश्या
नोपावत्कार्यत्वमिति मनुवृत्तेरावश्यकत्वात्तंत्रिमध्यपाताभावेपि तत्फलत्वसिद्धिरित्यर्थः। द्वारसाधा
रणपेक्षया तिथ्या कालत्वमेव निपतंप्रोक्षणाद्यनुष्ठाने हेतुमाह। नान्तरीयकमिति। शास्त्रापक्रमव राम
शादापतितमित्यर्थः। अत एव प्राप्त्यनिकत्वादातिथ्यायास्तंत्रित्वमितरयोः प्रसंगित्वमिति ज्ञेयं। सूत्रा ६
र्थस्तु। पतानामातिथ्यादीनामुत्पत्तौ पउपदेशोपदातिथ्यापामित्यादिस्तत्र निष्ठितं साधारणपेन

© Dharmartha Trust J&K. Digitized by eGangotri

निष्क्रितेपद्वर्हिस्तृकर्मप्रोक्षणादिकमिति॥ ॥देशपदव्याख्यात॥ ॥आपवादिकीसंगतिः प्राग्व
शःपत्नीशालाअपरेणपश्चिमतः पूर्वपक्षमाह पूर्ववदिति बर्हिस्तृणातीतिद्वितीययास्तरणस्यबर्हि
ःसंस्कारत्वावगमान्नेत्रेपिवास्तरणमितिस्तरणाकर्मत्वेनवर्हिः प्रकाशनागतेबर्हिषश्च साधारणपान्त्रा
दृत्रिरित्याशयः सिद्धांतमाह स्यादेवमिति बर्हिषावेदिंस्तृणातीतिवाक्येततीयाश्रुतेरनन्यगतिकत्वा
द्बर्हिस्तृणातीत्यत्रद्वितीयायास्त्वनीप्सितकर्मणापिसंभवान्मंत्रस्यचवेदिसंबोधनेनतत्प्रकाशनप्रधा
नतयाप्युपपन्नेत्तस्याश्चभेदात्स्तरणावमंत्रोप्यावर्ततइत्यर्थः। ननुबर्हिस्तृणातीत्यनेनबर्हिषएवसं
स्कार्यत्वप्रतीयते। हर्हिषिहवीष्यासादयतीतिसाध्याद्वेदिरासादनोपयुक्तेचबर्हिरितियुक्तंतस्यसंस्का
र्यत्वं। एवं वेतिमंत्रलिंगादपिहिषः संस्कार्यतावगमः वेदिसंबोधनपरत्वेऊर्णाम्रदसमित्यस्यासामंजस्यात।
बर्हिषावेदिमितिवचनेवेदनुसारतयाव्याख्येयमितिपूर्वपक्षयुक्तमभ्युपेत्यापिसिद्धांतमाह भवतुवेति तदानं
तेः स्तरणावर्त्तेः॥ ॥संनहनं॥ ॥आपवादिकीसंगतिः विहारदेशः पत्नप्रदेशः अन्यकार्यत्वादिति बर्हिः सा
धारणापूर्वविधिबलाद्वर्द्धिप्रयेतसंनहनादिनबर्हिः संनह्यतीतिविधिविहितेनवनेतरप्राग्वंशप्रा
पणार्थस्यैवोपाध्यायतस्यप्रवृत्तौविधानादितिभावः अत्रदृष्टांतमाहमपत्येति मन्त्रैसंनहनं हरणाइतिसू

© Dharmartha Trust J&K. Digitized by eGangotri

रा·दी·
७

माहारद्वंद्वेसमाप्तौ तत्र तथा मंत्रावृत्तिरिति तदर्थः ॥ ॥ इति श्रीमत्सद्रामचंद्रसूरिविरचितवेदघनाख्यवृ
त्तौ लौगाक्षिगृह्यदीपिकाटीकायां प्रभाख्यायां द्वादशाध्यायस्य प्रथमः पादः ॥ ॥ विहारः ॥ ॥ अंगस्य प्रधानतंत्रोप
जीवनं पूर्वपादे दर्शितम् । अत्र तु उदासीनानां पत्न्यतंत्रोपतौ वनेसापवादे चिंत्यंत इति पादभेदः तत्रास्मिन्नधि
करणे प्रसंगापवादः । क्रियते गार्हपत्ये पत्न्यग्निं वा पौपन्नश्रतां लौकिकशाखोरागप्राप्तस्यान्नौ भयपरः तत्र स्था
लीपाकः स्यादिति पचनप्रकाशादिके ति मांसं तु न पचेयुस्तस्मिन्नग्नौ यदि पचेयुः कव्यादं कुर्युरिति प्रतिषेधो
न वैदिकस्य संभवति पशुपाकस्य शामित्रे विधानेनान्यत्र तदप्रसक्तेरिति भावः एवं च मांसातिरिक्तपाक
स्याभ्यनुज्ञावगमात्सर्वार्थता पाभिदेनिंगामिन्यर्थः सिद्धांतमाह गार्हपत्य इति नन्वेवं सर्वार्थत्वाभावेऽप्यु
पादनलाघवादविरोधान्मांसपाकप्रतिषेधलिंगाच्च प्रसंगोपकारिता स्यादत आह मांसेति आहवनीये वपा
पशुरणस्य विहितस्य प्राप्तिकल्पार्थो निषेध इति भावः वस्तुतो विकल्पस्याप्राप्यत्वाद्दक्षिणाग्नौ पत्नी
व्रतश्रपणविधानाऽभेदवशेन प्रसक्ते मांसव्रते तत्पाकस्यायं निषेध इत्याहुः प्रसंगतो लौकिकपाकादिप्रस
क्तिस्तु रागप्राप्तपाकनिषेधात्स्थालीपाकादेः स्यादर्थस्यगत्याग्नौ विधानान्निरस्ता आयतनबहिर्भूतसाध्यप्र
काशादिकार्यं तु वहिर्न पचेदोषश्रवणादेव निरस्तमिति भावः विहारः अग्नित्रयं पूर्वप्रकृतं संगतिमाह पूर्वं

7

© Dharmartha Trust J&K. Digitized by eGangotri

ण्येति सूत्रं स्पष्टं ॥ ॥ सवनीये ॥ ॥ आतिदेशिकत्वेनैतत्संगतिः पूर्ववदत्र निषेधाभावाद्द्विकाशंकायां सुषिर
शिष्ट्वत्वात् सवनीयेष्वेवेति प्रतिसवनं क्रियमाणैः सोमांगैरित्यर्थः नन्विति पुरोडाशेनैकवचनान्माध्यंदिनस
वनमात्रनिर्देशात् द्रव्यायागांगयागसंदेशाच्च नैतल्लिंगं सवनीयपुरोडाशविषयत्वेनान्यथासिद्धं किंतु पशुपुरोडा
शविषयमेवेति भावः लिंगोपपत्तिप्रकारांतरेण पूर्वपक्षमाह एवंतर्हीति सिद्धांतमाह नैवमिति ॥ ॥ हविष्कृत
॥ ॥ अपवादिकी संगतिः हविष्कृत्पत्नी सर्वेषामिति प्रकरणाविशेषाद्धविष्करणयोगरूपस्य समाख्यासाधार
णत्वेति भावः वस्तुतः पत्न्युपवहनीयमवघातमात्रे विनियोगात्तदनुसारेण समाख्यायास्तन्मात्रेणोपपत्तेरवांत
रप्रकरणेन चाकाङ्क्षानवस्थावघातमात्रांगत्वासंलग्नत्वानुपपन्नेत्याह कृत्स्नत्वेति अपग्रहणं प्रकृतानुपयोगेऽपि
वैपक्ष्यापसाम्यात् अतश्चेति आग्नावैष्णवपशुवत्तिदेशादित्यर्थः तन्मध्यपातित्वाभिधानेन च प्रातर्माध्यं
दिनसवनिकानां ग्रहणं सूत्रं स्पष्टं ॥ ॥ पशौ तु ॥ ॥ आतिदेशिकी संगतिः अधिकाशंकामाह हविष्करणमे
वेति सिद्धांतमाह सहायेति प्रकरणाविशेषाल्लिंगाच्चाकाङ्क्षानंतरं सर्वसहायकरणार्थं प्रतीयते हविष्कृत्समा
ख्याप्राधान्येन व्यपदेशा भवंतीति न्यायेनोपपन्ना न व्यावर्तनापत्तिरित्यर्थः समाख्यया नियमेऽपि पत्नीसंय
नेतरसमुच्चयान विधिविनादेव प्रसंगसिद्धिरित्याहतेनेति सूत्रार्थस्तु तास्मीयसवनीकेषु पुरोडाशेषु सौम्या

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰
८

8

ऽग्निचयेष्ट्वपशौ संस्कृतेपक्वेसति विधानाद्धविष्ट्वं स्यात् कुतः पश्वपाकरूपकार्यनिष्पत्तावपक्वत्वादिति ।
॥ ॥निशिपते॥ ॥आतिदेशिकी संगतिः पूर्वपक्षमाह तत्रेति । उभयत्र मुख्यसाम्याभ्युपगमेपि प्रकृतवर्ष्ये सामाना
धिकरण्यपाठ्यान न परत्वमेवेत्यर्थः वस्तुतस्तु कौनन्व मुख्योन कर्मणीत्याह कौन्ने चेति । एवं च कर्णतोनुपस्थि
तेर्न तत्र च मध्यविधानं येन तत्त्वं त्रोपजीवनेन निशीथि प्रयोगविधिः स्यादित्याह अत इति । शब्देन तत्र मध्यपात
नुपस्थितावपि दर्शप्रयोगस्य दिवसारब्धत्वान्निशि क्रियमाणाया इष्टेरर्थान्तत्र माध्यपातावगतेर्पुनः प्रसंग
इति सिद्धांतमाह पद्यपातीति । न चैवमार्थिकोपस्थितेरनियतत्वान्न प्रयोगविधिसंकोचकत्वमिसाशंक्याह
अवश्यं चेति । तथा च प्रणापनाधंगानुसारेणोपस्थितेरवश्यकत्वात्संगोपपत्तिरित्यर्थः सौर्यादिविकृ
तावतिप्रसंगं वैषम्येणोद्धरति । विकृमेतत्तणीति । अतिदेशप्राप्तप्रातः कालरूपांगस्य प्रधानभूतापांवि
कृतावनुग्रहाद्दर्शांगान्वाधानेनांगगुणाविरोधन्यायेन बाधात्त्र दर्शे तत्र मध्यपात इति भावः । सूत्रे प्रत्यक्ष
श्लिष्टत्वादित्यस्य प्रत्यक्षे मुख्यवत्प्रतीते कालेन श्लिष्टत्वादित्यर्थः ॥ ॥प्रारंभणीया॥ ॥आपवादिकी संग
तिः पूर्वपक्षमाह न स्यादिति । प्रारंभणीयाजन्यसंस्कारस्यांतिपदर्शपूर्णमासप्रयोगपर्यंतानस्थानं वि राम
नाशकृतत्वापाः सकलदर्शपूर्णमासप्रयोगांगत्वापोगात्मध्यपातिविकृतिषु प्रसंगोपपत्तिमाह प्रकृ ८

© Dharmartha Trust J&K. Digitized by eGangotri

तौ हीति। सिद्धांतमाह उच्यत इति। आरभ्यमानपुरुषेच्छारंभयोगपत्तात्र ननु द्वारारंभयोगमेवारंभत्ताशयः। आ
रंभश्चैकरूपत्वेऽपि नाहतौ बीजं। न तु संस्कारानुवृत्तिरित्यारंभभेदाभ्युपगमेऽनुष्ठानभेद इत्यर्थः। कृतापुनस्तदर्थे नेति
स्मत्र शेषस्य तदर्थे प्रकृतमर्थं पुनर्न कृता। संस्कारानपवर्गादितो विकृतौ न स्यादित्यर्थः॥ ॥ विप्रतिषिद्ध॥
॥ प्रकृतिविकृतिप्रसंगोपस्थितविकृतिविशेषप्रसंगे विशेषचिंतनात्प्रसंगसंगतिः। एकाहेति। त्रिवृदग्निष्टु
दग्निष्टोम इति विहितेत्यर्थः। औपोति। ज्योतिर्गौरायुरित्येवं नामकानीत्यर्थः। भाष्यानुसारात्स्थितं विषयमुद्द
पाहइ हेमाद्रि। उभयत्रापि भूयस्त्वात्पक्षसाम्यान्न विशेष इति भावः। स्तुत्याकानीनामभेदेनानुष्ठानस्य
निर्णीतपाठ उपसदिति। तदेतद्भाष्यकारीयमुदाहरणं वार्तिकानुसारेणादूषयति। न लिहेति। वार्तिकोक्तमुदाह
रति। कामस्वास्विति। पंचार्थमिति। गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वादिति भावः। एतदप्युपांशुपा
जस्याभावाभावपक्षे उदाहरणं। तत्र तस्यत्वेनोदाहरणांतरमाह[illegible]नीयमिममाहुः॥ ॥ पुरस्तिवा
॥ ॥ आपवादिकी संगतिः। ऐन्द्राग्नविकारत्वादिति। तत्र द्वादशकपालत्वस्यापि वैकल्पिकत्वादिति भा
वः। अत्राधिकरणांतरे काधिकरणं प्रवेके मन्यंत इत्यतः कोपयुक्तापेक्षावेतद्भूयस्त्वेन पूर्वपक्षमुक्त्वापु
रस्तात्वेऽपि नेमसिद्धांत इत्यैकाधिकरण्यं दर्शितं तदेकीयमतोपन्यासात्पर्यतयमकृत्स्नमपि स्याहुएके

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी· ५

9

तिः ॥ ॥अंगगुणः ॥ ॥प्रसंगानुनिष्पन्नबाधप्रसंगाद्ध्यायसंगतिमधिकरणांतेवक्ष्यति· आपवादिकत्वनेतरापे
क्षाद्वादशाद्याक्षापक्षेस्वविरोधाद्दीक्षणीयायामपिपर्वकालत्वेसंभवतामर्थः मुख्यत्वाद्धेति· एतदुक्तं भूयस्त्वस्याप्यु
पलम्भेनेत्· तेनौपवसथ्याहः क्रियमाणोपसद्ग्नीषोमीयपशुप्रयोगशादीनांभूयस्त्वेनपर्वकालत्वेपर्वपक्षोपि बा
ध्यः भूयस्त्वप्राबल्यस्योक्तत्वेनमुख्यत्वेनपूर्वपक्षस्यमंदत्वात्· यदितुसुत्याकालानामंपंचानांसवनीयपशुतमुरो
डाशानुबंध्यावभृथोदवसानीयानांचोपसदादिभ्योपिभूयस्त्वमनुगृहीतोयुक्तइतिभूयस्त्वेनैवसिद्धांतास्तिद्धिरिति
विभाव्यतेतदासवनीयादीनामभावेकवयंचितेत्याह· आश्वयतामनवंतरंकश्चिद्विदितिशेषः प्रधानविधिना
हिपूर्वमंगमनुष्ठाप्यतेपश्चात्तुतदंगापितिपूर्वांवुगतांगाविरोधात्तदंगानुष्ठापकतेतिभावः ॥ ॥पारिधिः ॥ ॥सु
गमत्वेतत ॥ ॥योप्युक्तं ॥ ॥ आपवादिकीसंगतिः विरुद्धेष्टितिस्तवकः परिधिर्भवति· एवंतत्रवत्स्यादिष्टि स्पष्टः
सिद्धांतमाह· परिधौः सतइति· परिधीयतेनेनेतिपरिधिरितिव्युत्पत्यापरिच्छेदहेतुरोदशकयनन्यायेनप
रिधानकालपरिछिन्नर्भवति· एवंतत्रत्वत्स्यादिष्टिप्रयुक्तस्येवनियोजनांगत्वावगमात्स्वधर्मविशिष्टतयापर्वा
वगतत्वेनोपवत्यावतयातदुपजीवकपशुधर्मातिदिशंतिशेदशस्पष्टं बन्नतबाधितिभावः पशुधर्मातांवाचनिकत्वमे
मभिरासामायाह· नियोजनेनेति· चोदकेनेतिपशुपस्थानामुपमतिदेशपरम् ॥ ॥पशुसवनीयेषु ॥ ॥पूर्वपक्षधर्मत्वप राम ५

© Dharmartha Trust J&K. Digitized by eGangotri

पशुधर्मवाध्ययुक्तः अग्नीषोमीयसवनीयपशुहविः प्रसंगात्पशुधर्मबाध आशंक्य निरस्यत इति संगतिः ते प्रसंगि-
ता इत्यंतस्य कविकल्पपूर्वपक्षस्तस्मादविशेष इत्युपसंहरिष्यते पशुरेवेत्यादिः सिद्धांतकोटिः विपरीतवेस्य
स्यसवनीयाः प्रसंगिता इत्यर्थः ननु सवनीयास्तंत्रिणः पशुः प्रसंगीति तदर्थः अस्य पक्षस्योत्तरत्रानुपन्यासा
दिस्यवधेयं नियामकाभावादविशेषं वक्तुं नियामकं तावदाह पस्येति प्रथममनियामकस्याभावे विधित्सोपशंका
ते नादौ चेति वस्तुतः पशुकानुयाजानामेवोत्कर्षविधानान्न्यस्त इत्युक्तं सिद्धांतमाह पशुरेवेति ननु विकल्प
पूर्वपक्षात्पक्षे सार्थकता प्रसंगस्येति नानर्थक्यमत आह नित्येति शेषं सुगमं सूत्रार्थस्तु न्यपशुसवनीयेषु वि
कल्पः प्रसंगस्यस्यात् वैकृतानुयाजोत्कर्षश्चेन्नियामक इति शेषः तन्त्रः पतः सोप्युभयोः कृतिविशेषाभावादि
ति ॥ ॥पूर्ववत॥ ॥पूर्ववद्वैकृतविशेषोपदेशात्तशेनतंत्रि वैकृते रातिदेशिकी संगतिः नु सपशुसवनीयाविकृतेष्व न
ति कालप्रकृत्यासहप्रयोगाभावात्के पचि तेस्य तत्राह तत्रेति पूर्वपक्षमाह प्रकृतेरिति प्रकृतिपूर्विका हि वि
कृतिरतिदेशेन तदुत्पत्तौ वनादिति प्रकृतेरेव तंत्रित्वे नियमतात्पर्य पूर्वप्रवृत्ता प्रकृतिः पश्चात्तु नैमित्तिकी काम्या
वा विकृतिरित्यर्थः तत्र पूर्वप्रवृत्तिमप्युपेत्यतावत्सिद्धांतमाह पश्यामीति अत्र अर्थकप्रतिहतानातिपरोतबलाव
नमिति न्यायादिति भावः पूर्वप्रवृत्तिरप्यासिद्धेत्याह न चेति पावकेष्टौ विकृतिप्रयोगस्य दृष्टेहि तद्दतः पातान्नप्रसंगः स्यात्स

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰दी॰
१०

त्वुद्धृतोपनिराकृतइत्यर्थः पूर्वविहितस्यास्य वचितस्य नैमित्तिके बाधितेतिन प्रसंगोपयोगिनी किंतु विहितेरेव
तंत्रित्वहेतुरित्याह तस्यादिति॰ सूत्रार्थस्तु अपूर्वस्याविघ्नेन्यादृते कृतेप्रकृतौ प्रसंगस्यतेसमानतंत्राचेतः अ
न्यथाऽपूर्वमेगमपनिमित्तवात्स्याक्षिके वौगाकारादनर्थकं स्यादिति ॥ ॥ अधिकश्चा ॥ ॥ भूयसांप्राकृतानैपा
दीनामन्यविकृतिधर्मप्रसंगवदिहाप्येंद्राग्नादिवत्तुधर्मरागमन्यथा वापद्धिवधर्मप्रसंगो ऽत्रेतिपैशिको
संगतिः वैश्वदेविकस्य पर्वतिगतः अन्यस्तु गमम॰ सूत्रार्थस्तु अधिकः प्रस्तुनादिर्गुणः साधारणो बर्हिर्मात्रे
प्रसज्यते अविरोधात् ॥ कीदृशो गुणः अभ्युदये अपि शब्दाद् अन्येविद्यमानः यथा शिष्यस्यकोस्य भोजितव गु
रुशिष्यभोजित्वनियमवतोनुरोधेनगुरोः कांस्यभोजित्वमिति दृष्टांतार्थः ॥ ॥ तस्य च हेमः ॥ ॥ आपवादिकी संगतिः
पूर्वपक्षमाह॰ एवमिति॰ पूर्ववद्विशेषधर्मवतएवतंत्रित्वमितिभावः अविरुद्धत्वेनसाधारणत्वात्त्रैतंत्रि
तानियामकौतोविरोधस्य तु नेपुरत्वाभूयस्त्वाभ्यामेवतंत्रित्वव्यवस्थेतिसिद्धांतमाह पैतमिति॰ सूत्रे स्पष्टार्थ
म् ॥ ॥ इतिश्रीमत्तत्सज्जमचं रव्यसूरितनूजवैद्यनाथकृतायां शास्त्रदीपिकाटीकायां प्रभाख्यायां द राम
शाध्यायस्य द्वितीयः पादः ॥ ॥ विश्वजिति ॥ ॥ अत्र विकल्पसमुच्चयपक्षितेस्तिपादभेदः अर्थ्यप्रसंगतिस्तु तु १०
स्याअन्येनकार्यसिद्धेरन्यस्यानिवृत्तिरितिप्रसंगास्यादियेकार्थास्तु विकल्पेरन्नित्यत्रमतएववदंत्यते

© Dharmartha Trust J&K. Digitized by eGangotri

अवभृथसमाप्तौ तस्या नान्त्ये नप्रदेशाद् परिहरति · महाव्रतस्य तन्त्रे आगमेऽयमर्थः · दशापेयतान्तं केवलमु
पतायं दार्शपौर्णमासव्रते ऽन्तेन समुच्चयो ऽनेन गतार्थतामाशंक्य परिहरति · महाव्रतेति · तथा च तत्र समुच्च
यहेतुतयोक्तलिंगदर्शनस्येहाभावात् तन्न गतार्थतेत्यर्थः · एकाधिकरणापि ति · भूयस्त्वादपि मुख्य नैव प्राब
ल्यतादिमतेऽयमर्थः · विश्वजिति नाम वशाद् सवलकः · तद्भावे वैकृते स्यादित्यन्यथा व्याख्याने कृतापि
त्यर्थः · शेषं सुगमम् ॥ ॥ अनुनिर्वाप्येषु ॥ ॥ पूर्ववदिहापि भूयस्त्वापवादं दर्शितं देशिकी संगतिः · चयन
प्रकरणागतमुपाहरति · अग्नाविति · पुरोडाशमात्रं चितिसंबंधः · देवसूनामिति · एतेन सवनेऽयमर्थो वादः प्राग्देवपत्नी
मानेसु वैतेऽपि अनुज्ञाने तौ सुग्रहद्योपशौ देवस्या देवसुवसेषामिमर्थः · स्वाधर्म्यस्य च धर्मतांते त्रिवलीप्रमथः प्र
वपक्षमाह भूयस्त्वादिति · अनुनिर्वाप्याणामिमनंतरं स्वाधर्म्यमपि मनुषंगः · सिद्धांतमाह · नहीति · स्वहवि
षो पूर्वे गेवा भूयस्त्वमेव तं त्रितानि पामकं स्यात इह तु तंत्रमध्यमातस्यस्यैव प्रतीतेः सएव प्रसंगितापादक
इति न निपामकोत्तरावतारइत्यर्थः · फलितमाह · पुरोडाशस्येति · पुरोडाशस्य हि स्वधर्मः · केवलाग्निदैवत्यः स्वि
ष्टकृत · अनुनिर्वाप्याणां तु स्विष्टकृदुराकाग्निदैवत्य इति विरोधे तंत्रित्वात् पुरोडाशधर्मानुग्रहस्तेन चेतरेषां
प्रसंगात्सिद्धिरिति सिद्धांतितं · एकाधिकरणापमतानुवर्त्तिनां गुरूणां मतं दूषयितुमाह · पत्विति · वैषम्यं · धाष्ट्यं

© Dharmartha Trust J&K. Digitized by eGangotri

शा· द्री मः शेषं स्पष्टम् ॥ ॥ एककर्म्मेति ॥ ॥ अत्र प्रसंगापवादसंगतिः समुच्चयेतदभावात् सहसंभवादिति
११ ऊर्ध्वत्वादीनामदृष्टार्थत्वादिति भावः ॥ ॥ एकार्थास्त्विति ॥ ॥ आपवादिकीं संगतिं पूर्वपक्षमाह सर्वा मे
ति न न्वेके नकार्यानिष्पन्नादितरस्यानर्थक्यादननुष्ठानमत आह संभवति चेति ननु दर्शितान घटपुरि
त्यादिवचनवन्नाम्नोति षोमाभ्यासेप्यत्रतादृशवचनाभावाद्गुणानुरोधेन प्रधानावृत्तिर्न्न युक्तेत्यत आ
ह समिच्छा वेति व्रीहियवयोः प्रयोगविध्युपसंग्रहानुरोधाद्भयातिति रिक्तन्नैरपेक्ष्यमपेक्षाहि यिरिसाद् व
न्ती यथा बोध्यत इत्याशयः एकार्थानामिति उपकार इति साप्तिसप्तमी अवान्तरोपकारभेदाभावे सति
निरपेक्षतयैकत्रार्थे विनिपुक्तं वं विकल्पप्रयोजकमिमर्थः ऊर्ध्वं पाघारयति कृष्णमाघारयतीत्यत्र त
माघारपमीप्यादीनां निरपेक्षतयाऽऽघारार्थानां विकल्पवारणायासत्यपि तन्त्रौर्ध्वत्वादिजन्यानियमादृष्ट
रूपोपकारभेदात् तावन्मात्रो भौ चरस्वर्गपश्वाद्येककफलानां कर्म्मणामवान्तरोपकारभेदाभावाद्विक
ल्पः स्यात् तत्रावान्तरोपकारस्यैवासत्त्वेन तद्भेदस्यसुतरामभावात् तस्य शेषिगतत्वनियमेनादृष्टमात्रे
तस्याभावात् अतो विशेष्य दर्शनं तत्राप्याग्नेयादीनां वराणां विकल्पवारणाय निरपेक्षेति सोमातिष्ठमवादितक राम
त्व दृष्टान्तत्वैबाध्यमाह सोमातिष्ठेमो होतीति अदृष्टार्थानामित्यवान्तरोपकारभेदप्रदर्शनं अत एवापपीयेव ११

© Dharmartha Trust J&K. Digitized by eGangotri

कल्पाभावोक्तिः समुच्चयप्रमाणाभाव्याह· प्रकरणेनेति· व्रीहियवयोरपि प्रयोगवचनसंग्रहानुरोधे
न समुच्चयप्रमाणं शक्यं निराकरोतीति· व्रीहीति· प्रत्यभावगतविनियोगानुसारेणैव प्रयोगविधिप्रवृत्तेस्तेनापि वि
कल्पेनैव तयोर्ग्रहणाभिप्रायः। इति पासमुच्चयोपपत्तिं निराकरोतीति· मिश्रत्वमपीति· तदुक्तं वार्त्तिके· मि
श्रे वीपत्यमानस्याभिप्रायाणां विच्छेददर्शनादिति· किंच· नियमविधोपपत्या प्राप्तस्यानियम करणात्प्राप्तेश्च
प्रत्येकमेव नोक्ततः। वगम्यात्र मिश्रत्वसंभवेऽस्त्येवं· विकल्पसाधनस्य प्रकृतोपयोगमाह· ततदिति· प्र
सङ्गात्प्रकरणानाकांक्षत्वादध्यायासंगतिमाशंकते· ननु चेति· प्रासंगिकी संगतिरित्याशयेन समाधत्ते· स
त्यमिति॥ ॥प्रायश्चित्तेन॥ ॥आतिदेशिकी संगतिः· प्रत्यय घृतम् इति वैगुण्यस्य साधानार्थत्वसाम्याह
तांतमात्रार्थे· तत्र यान्ती पुनरग्रंथे पाधिकृतादेरेवाविचारविषयत्वोक्तेरिति बोध्यं· मिश्रं तमाह· एकै
केनेति· दर्शपूर्णमासातिक्रमप्रकृतिमिति मैक्यादेपि भिन्नस्य वाक्यशेषावगतस्य च तन्निमित्तप्रयुक्तपप
रिहारस्याप्येकत्वात्तन्निरपेक्षत्वया विहितयोर्विकल्प एव प्रकृतेऽस्मदर्थः· सन्नेति निष्पन्नेन वैगुण्येनेम
र्थः सर्वेषु प्रायश्चित्तेषु तन्निहरणापेक्षमेव कार्यमिति शेषः॥ ॥समुच्चयः॥ ॥न दोष इति· तदुक्तम् कवाक्यशेष
घभावादिति भावः· संगतिमाह प्रसंगादाहरणेति॥ ॥पंचशरावे॥ ॥इहापि पर्व वत्सं गाभावा दातिदेशिकी

शा.दी. १२

संगतिः पूर्वपक्षमाह मंत्रेति। अध्ययनस्य दृष्टार्थतया तत्र धर्मविधानानर्थक्यात् स्वाध्यायेत व्यमित्यादि

निषेधेन च ध्येतव्यमित्यनेन प्रयोजनवदुच्चारणानुवादेन धर्मविधिरिति कर्मकालीनमंत्रोच्चारणागतेस्य

र्थः तत्रापि प्रयोजनाकांक्षायामुक्तं प्रयोजनमाह अपि चेति। पदार्थप्रसंगतद्विधिप्रसंगविचारः प्रासंगिक इत्यपवा

दप्रसंगतिमाह पूर्वपक्ष इति। ॥ ॥भाषा॥ ॥बाधे सति प्रसंगाभावाद् तिदेशिकी संगतिः अध्ययनधर्माणां

कर्मप्रकरणपाठाभाव इह तु स्वरस्य ब्राह्मणेऽपि पाठ इत्यतिकाशंका। पूर्वपक्षमाह वाचनिकेति। लिंगा

देरप्राप्तानां विधिरप्राप्तस्वरार्थ एव वचनविनियोगस्यानाम्नायपठितस्वरविशिष्टानां विधिः। एवं समाम्ना यं

यस्वरस्य तु न कर्मांगतया विधिरिति तस्य पाठपरतो धर्विरोधनिरोधे चोपयोग इत्याशयः। सिद्धांतमाह

नैवमिति। अत्रेत्तिरस्याशाद्वाद्विधिव्यापारविषयत्वं बोध्यं। स्वरपाठान्यथानुपपत्त्या विध्यंतरकल्प

नातिरसायत्तु लिंगप्राप्तेषु प्रयोजनेत्यसत्त्वमुक्तं वाचनिकेषु तन्निरासायाह स्वरांतरेति। न च मंत्रसमाम्नाय

र स्वस्याध्यापाद्वात् कथं विवक्षेति वाच्यं। तस्यानुपूर्वीव मंत्रस्वरूपांतर्गतत्वाद्विवक्षोपपत्तेः। तदेतदाम्नाये राम

नैतनेन दर्शितं। सूत्रे भाषास्वरेणादेन छंदोगाबह्वृचाध्वर्यवतथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भा

षिक उच्यत इति वचनं लक्षितोपात्तस्वर उच्यते। एरवत एरं ह्व तो हे पमिति वक्ष्यवचनस्य समाम्नायगत १२

© Dharmartha Trust J&K. Digitized by eGangotri

बे स्यान्निषेधो बाधकः स्यादित्यर्थः ॥ ॥तन्त्र्यापवादात् ॥ ॥आपवादिकी संगतिः पूर्वपक्षमाह मंत्रस्वरूपेति
स्त्वरस्याशाद्दृत्वान्न हि शिष्टमंत्रविधानायोगादिति भावः असमपीति स्वातंत्र्येणास्वरविनियोगेपि मं
त्रस्वारूपस्यान्यतो न वगमाद्दत्रैव पथ्यास्वरानुपूर्वीकस्यावगतमंत्रस्वरूपस्य विनियोगान्मंत्रवं
तु गौतवे नैव स्वरविनियोगसिद्धिरित्यर्थः ॥ ॥मंत्रोक्तां ॥ ॥मंत्रसमवेतार्थकपदेनेतरेषां कार्यसि
द्धेः प्रसंगमाशंक्यातदपवादमाहादिति देशिकी संगतिः मंत्रमध्य इति वचनविनियोगे प्रतीकोत्तापि प्राप
लिंग विनियोगस्य तु मंत्रोच्चारणाकाङ्क्षापि प्राप्यमंत्रोतेन तोपि वेत्यमिपपपक्षः समवेतस्य पदः प्रतीकम
त्रविनियोगापि प्रापेणाघकोटिः मंत्रारंभमात्रेणातस्य करणत्वोपपत्तेस्तदुच्चारणाकाङ्क्षेति पक्षः मं
रा त्राने तर्थस्य वधानेच मंत्रस्य करणत्वोपपत्तेरनियमपक्षोप्यानेः सामर्थ्येन समवेतपदस्यैव वकर्मांग
त्वमितरेषां तु नहाकाङ्क्षानिवर्तकत्वमात्रेणोपयोग इत्यतिमपपभोपपत्तिः सिद्धांतमाह सकलस्ये
ति अध्ययनविधिवशेन मकृत्स्नमंत्रस्य प्रयोजनापेक्षत्वात् समवेतार्थकपदैकवाक्यतया कर्मां
गत्वमसमवेतार्थानामप्यावश्यकमिति सर्वतस्तवाक्यवधानेन कर्मानुष्ठाने अन्यथा मंत्रमन्यस्मृ
तिविच्छेदेन वैगुण्यापत्तेरित्यर्थः संनिपातः संयोजनं ॥ ॥संततं ॥ ॥आतिदेशिकी संगतिः संततामि

तं

© Dharmartha Trust J&K. Digitized by eGangotri

ति॰ चपनप्रकरणागतमिदंवाक्यं॰ सिद्धांतमाह॰ ॰स्यादेवमिति॰ द्वादशानांहोमानामेववसोर्धारेतिनामधेयं
वसोर्मेधारेमर्थवादेनतस्य वत्तिनिमित्तोक्तेरितिभाव॰ शेषंसुगमम्॥ ॥आघारेच॥ ॥आतिदेशिकीसंगतिः॥ आधि
काशंकामाह॰ कर्मैकत्वादिति॰ दीर्घधारस्येति॰ दीर्घमाघारयतीतिश्रवणादित्यर्थः॰ दीर्घं॰ दीर्घकालं॰ एवंचा
वत्वाद्दीर्घकालस्यवारणाय सातत्यविधिरितिभाव॰॥ ॥मंत्राणां॥ ॥सुगमं॰ संख्या॥ ॥संगतिर्मूलएवपूर्वाधि
करणोदर्शिता॰ सिद्धांतमाह॰ संख्यावत्त्वादिति॰ तद्धिविवरणादित्यर्थः॰ इष्टकामंत्राणांनार्थमभ्यासानस्यलिंगान्तं
त्रस्यचप्राप्तत्वात्संख्यापाठवशस्यविधेयत्वेनप्राप्तिकानुवादत्वानुपपत्तेश्चेतिभाव॰॥ नन्वन्तरमंत्रैः॰ पूर्वमंत्र
तेन्यस्यत्वविरोधेहानत्वंप्रयुक्तानांकरणात्वानुपपत्तिरितिमतआह॰ तत्रेति॰ ॰पानमाह॰ संसंस्वेति॰॥ ॥प्रात्स
ग॥ ॥आपवादिकीसंगतिः॰ प्राप्तत्वोति॰ संख्यारहितप्रयत्नाविहितादित्यर्थः॰ वसन्तेवसन्तेभगोवाविमावादिपं
त्क्याद्यर्थमिदं॰ अभिप्रेतशरणाभिदोहाहरणांप्राप्तस्यातद्भाव ॰रनुपयोगादित्यर्थः॰ मन्यतइति॰ पूर्वपक्षसा
धकत्वेनेत्यर्थः॰ शेषंस्पष्टम्॥ ॥होत्रोक्त॥ ॥आपवादिकीसंगतिः॰ स्पष्टमन्यत॥ ॥इतिश्रीमत्तत्त्वप्रकाशमहेश
श्रीवरात्मजवैद्यनाथकृतायांशास्त्रदीपिकाव्याख्यायांप्रभाख्यायांद्वादशाध्यायस्यतृतीयःपादः॥ ॥जयाष्ट॥ ॥
म अत्रसमुच्चयंदभावचिंतापादार्थः॰ तत्रद्वारेणप्रसंगतद्भावपर्यवसानादध्यायसंगतिः॰ अविवक्षितत्वेति॰ अ राम १३

© Dharmartha Trust J&K. Digitized by eGangotri

समवेतार्थविषयत्वेनानिष्प्रयोजनत्वादिति भावः । वैश्वावीः विश्वदेवस्यामच्चं आदिपदेन वार्हस्पत्यामनूच्य
वाग्यत इत्येतिव्रतपंतरस्य विकल्पसमुच्चये प्रयुक्ति योगिनः संग्रहः । स्तु तेरदृष्टार्थत्वेनात्र शास्त्रा विकरतोदित्योयाध्वा
य एवो नैः आशासनं फलस्येति शेषः । पूर्वपक्षमाह विकल्प्येति । उपादिसमाख्यैक स्वे नैककार्यत्वकल्पना
दृष्टाशयः । सिद्धांतमाह अदृष्टार्थत्वादिति । उपादिसमाख्यायास्तु मंत्राणां दिवदनैकसाधारणत्वान्नैका
र्थं क्वचित्तावकत्वेति भावः । स्तुत्यैवाप्रमाने क्षितिप्राप्तिकत्वापि प्राप्तं । आशीः प्रयुक्त्वादिति च उपादि प्र पत्काकस्या
प्युपनक्षणाद्यपीति बोध्यं ॥ ॥पा ॥ ॥ समुच्चयापवादसंगतिः । पूर्वपक्षमाह प्रयोगेति । पुरोनुवाक्या
मनूच्य याज्यया जुहोतीति समुच्चये पानुवादत्वानुपयोः समुच्चये प्रवघ्नगल० नपोर्द्धिविप्रवदा नानास
इति भावः । सिद्धांतमाह विकल्पइति । प्रवनेनानिंगो नैकार्थ्या द्विकल्पइत्यर्थः । दृष्टांतवैषम्यमाह याज्ये
ति । याज्यातः पूर्वपव्यपानत्वार्थकसमाख्याया अनन्यथासिद्धत्वासंख्यावशाद्भिन्नमंत्राणामिवत
योः समुच्चयइत्यर्थः ॥ ॥ऋ पदं प्रोक्षुत ॥ ॥ विकल्पापवादसंगतिः । इतीति । इत्यादिवाक्यवि
हितानामित्यर्थः । एककार्यत्वादिति सौत्र हेतोरेकक्रियासाधनत्वादित्यर्थं पन्चानामेकदेशिनो मतमाह त
त्रेति शंकाव्याने मैतदूषयति । कथमिति ऋपद्वारा इत्यादारामेकार्थवं स्तत्वउक्तमिति समाधान

© Dharmartha Trust J&K. Digitized by eGangotri

रा·प्र·
१८

व्यातेनक्षमन्त्रेतिशंतमाह· सन्त्यमिति· एवंसतिक्रपसमुच्चयविकल्पयोस्तात्पर्यपर्यवसानमित्याह·
तदनेनेति· अत्रचदर्शाभिः क्रीताभ्यांतिल्लिंगदर्शनमपितत्पर्यग्राहकंसमुच्चयेबोध्यं॥ ॥संस्कारेच॥ ॥आ
तिदेशिकीसंगतिः· पूर्वपक्षशेषवदितितत्रोपात्तयोगेपिप्रतिपत्तित्वांशमात्रेदृष्टांतः ननुव्यापारेतत्रप्रयाजसं
बंधित्वशेषत्वयोरिवात्रप्रतिपत्तिगमकाभावात्कुतएवोमन्त्रादिस्तन्नोक्तन्यायसिद्धतोक्ता· वस्तुपागावशिष्टतया
प्राकीर्णाकरत्वेनप्रतिपत्तिसाकांक्षत्वाद्दृष्टार्थत्वाच्चन्यायद्वयसिद्धत्वंवापिप्रेतमिति बोध्यं॥ ॥संख्यासु॥ ॥
समुच्चयापवादात्संगतिः सिद्धांतमाह· संख्येति· संख्यायाः संख्यांतरव्यवच्छेदकत्वेनेवसर्वत्रान्वयस्यवक्तव्यत्वा
दितिभावः॥ ॥द्रव्यविकारान्तु॥ ॥आतिदेशिकीसंगतिः अधिकाशंकामाह· तत्रेति· अन्यथातिदेशादेवप्राप्तेः
पशोःपुनर्वचनमनर्थकंस्यादितिपूर्वपक्षांतरमाह· एवमर्थमिति· प्रतिपत्तित्वेनविधानार्थमित्यर्थः दृष्टार्थत्वा
दिति· तायनीप्रतिपत्तिरूपदृष्टप्रयोजनत्वात्तस्यचविकल्पेसतितायन्यंतरस्यप्रतिपत्तिनोपादानिष्यन्तेरि
त्यर्थः नियमार्थमिति· विधिनाघनादन्यथापत्नीसंयाजानामप्राकृतेकार्यकारित्वापत्तेश्चेति भावः सूत्रार्थस्तु
द्रव्यस्यावस्थाविकारान्तवाभ्रातृअर्थकर्मयपत्नीसंयाजरूपंप्रर्थपूर्ववत्प्रकृतिवत्स्यात्। तथासतिविकल्पेप्राप्तेवि राम
धेर्नियमप्रधानत्वाल्लाघवमितिशेषः॥ ॥उरवायां॥ ॥आतिदेशिकीसंगतिः अग्नेःचयने· ब्रह्मवर्चसका १८

© Dharmartha Trust J&K. Digitized by eGangotri

मस्यप्रयोगेष्वन्ततोवक्ष्यमाणाद्धोमाग्निप्राप्तस्यावदव्यात्तस्यापवादोयमर्थः· उखायामिति· उखायामाहवनीयाग्निधारणापा
त्रेयजमानगत्वगतशिक्यैकदेशपर्यंतंछिद्यते· ततौखायांसंतापेनाग्निंतनयतीतिवाक्यादुत्पादितनुखाः सन्निमइ
मर्थः· संदेहेविकल्पोक्तिः पाक्षिकत्वमपाकरोति· मुख्यविकल्पस्यातुल्यबलत्वेनासंभवात्· अतएववक्ष्यति·
विकल्पसमुच्चयविचारेसमाप्यइतिपूर्वपक्षमाह· अवधानमात्रमिति· उखायांधारणमात्रमित्यर्थः· नहो
मः· नहोमार्थधारणं· तस्याङ्गत्वादप्रकृतत्वाच्चेतिभावः· काम्यमतत्वापेयमत्रेसमानकर्तृत्वमात्रेविवक्षितं
नतुपूर्वकालत्वमपि· पाठक्रमबाधापत्तेः· तस्माद्धोमार्थउखेऽग्न्यंतरंकाम्यमप्रतिधेयमितितात्पर्यं· सिद्धांत
माह· स्यादेतदिति· शब्दादुपस्थितस्यभावेप्यर्थादुपस्थितत्वाद्धोमार्थमवधानमर्थप्राप्तमेवास्त्वपइतिका
म्यनन्निमित्तबाधइत्यर्थः· विकल्पइति· तथाचसमुच्चयापत्तदभावचिंतापादार्थः· समुच्चयाभावत्वात्क्वचिद्विक
ल्पेपर्यवस्यतिक्वचित्तुबाधइत्यवांतरभेदमात्रमभिप्रायः· सूत्रे· नियोगेऽवधानमात्रइत्यर्थः॥ ॥सआहे
वनीयः॥ ॥समुच्चयाभावातातिदेशिकीसंगतिः· गतश्रीरिति· धार्योगतश्रियआहवनीयइत्यादिविहितइत्यर्थः·
गतश्रियः प्राप्तश्रियोयजमानस्य· होर्बंसुगमम्॥ ॥तस्मिन्॥ ॥आतिदेशिकीसंगतिः· अधिकाशंकामाहस
र्वंनहोतीति· होमार्थत्वादिति· यदाहवनीयेजुहोतीतिवाक्यादित्यर्थः· एवंचाहवनीयस्यानापत्प्रासंस्कार

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ दी॰
१५
15

तिदेशाइतिभावः पध्यनाद्यसंभवान्नात्रसंस्कारप्राप्तिरितिसिद्धांतमाह सप्तमिति आधानस्य होमा
नंगत्वादयितं नप्राप्तिरित्यप्याहुः॥ ॥निमधारणे॥ ॥आतिदेशिकी संगतिः अधिकाशंकयापूर्वपक्ष
माह तत्रेति गतश्राधारणास्यपुरुषार्थतया आहवनीयधर्मत्वाभावेन तस्यानायध्येऽस्वेप्राप्त्यसंभवाद
प्राप्तस्य च निषेधायोगान्नापकविधिकल्पना प्राप्तप्रतिषिद्धत्वेन ग्रहणाग्रहणावद्विकल्प इत्यर्थः त
स्य धारणं सामान्यवचनप्राप्तेगतश्रियो धारणारूपमेवेति संबंधः उख्यानुख्याहवनीयसाधारणात्तदुख्य
विषये प्रतिषिध्यत इत्यर्थः॥ ॥परार्थानि॥ ॥सुगमम्॥ ॥अनियमः॥ ॥एतदपिस्पष्टं॥ ॥मुख्योवा
॥ ॥एतदपिसुगमं॥ ॥सत्रे॥ ॥गृहपतिशब्दार्थस्यसाधारणायेविकल्पेदेवप्रयोगः फलभूयस्त्वप्र
पुरुषस्वसंस्काराधिक्यादितिपूर्वपक्षः कर्मकर्तृणामावाप्राधान्येनव्यपदेशाभवेतीतिन्यायेनसमा
ख्योपपत्तेर्न फलभूयस्त्वनिमित्ता फलभूयस्त्वं तु वाचनिकं न समाख्याकल्प्यमितिनतत्रसंस्काराधिक्यं
प्रयोजकमितिसिद्धांतः अत्राधिकरणे विप्रतिषेधपरमितिसूत्रेणाग्निष्टुविरोधे फलिसंस्कारबाध उक्तस्त राम
दुपन्यस्यति पत्नेति आर्त्विज्ये यजमानस्यगुणत्वेनयेयजमाना इतिवाक्येनाविधानादार्त्विज्ये प्रधानस्थितं १५
गगुणाविरोधन्यायादार्त्विज्यानुग्रह इत्यर्थः संस्कार इत्यनेनगुणत्वमुक्तं इत्यनुषंगः शेषं सुगमं प्र

© Dharmartha Trust J&K. Digitized by eGangotri

शा·दी·
१६

16

मुक्तात्मा गासंगतिमारेत विप्रतिषेध इति· पूर्वपक्षमाह तत्रेति· स्मरणं· यस्मिन्नुकर्मणामस्यत्री लिकर्मा
ति तांत्रिका· याजनाध्यापने चैव वृत्ति अनुष्ठान प्रतिग्रह इति क्षात्रस्य वार्त्तां स्मृतिः· पुरुषार्थं पुरुषार्थत
या शास्त्रापनियम वोधके न [illegible] मनत्या· प्रकरणाद्य भावादिति भावः· अध्यायार्थमुपसंहरति· मध्य इति·
तंत्रस्य मध्ये इति मध्येतंत्रे· यस्य मध्येतंत्रेपेषामि [illegible] वपः· इदानीं कृत्स्न शास्त्रार्थमुपसंहरति [illegible]· ति तास्य इ
ति· चतुर्धा· प्रमाणास्त रूपसाधन फल [illegible]: लक्षणैः अध्यायैः॥ ॥ कृपार्थसारथ्येवी [illegible] गरिमा [illegible] चयेम
तिः॥ तथापि समकृतकृपातेनैतां समयेत पत॥१॥ मुनिरस्ममुनिचंद्र संमिते द्वे अभतरमाधवमांसि श्रु
कृपक्षे॥ पुरहरमहिनाति थेोपुगाद्यो कतिरियमां शापदे र्पिता प्रभाख्या॥२॥ ॥इति श्रीमन्महस्त कृ न
जन्न सिंधे चंद्रवर्णशास्त्रपारावारीणाश्रीरामचंद्रसूरिवरात्मजवैद्यनाथकृतायां शास्त्रदीपिकाव्याख्या
यां प्रभाख्यायां द्वादशस्याध्यायस्य चतुर्थः पादः॥ ॥ [illegible] लक्ष्मीनारायणार्पणमस्तु॥ ॥ ॥८॥

राम
१६

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri